শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ ষটসপ্ততিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটসপ্ততিতমঃ সর্গঃ ॥

## শ্রীরামেণ ৱৈষ্ণৱং ধনুরারোপ্যামোঘেন শরেণ পরশুরামস্য তপঃপ্রাপ্তানাং পুণ্যলোকানাং ৱিনাশনং পরশুরামস্য মহেন্দ্রপর্ৱতং প্রত্যাগমনম্

শ্রুৎৱা তু জামদগ্ন্যস্য ৱাক্যং দাশরথিস্তদা।
গৌরৱাদ্যন্ত্রিতকথঃ পিতূ রামমথাব্রৱীৎ॥ **1.76.1** ॥

কৃতৱানসি যৎ কর্ম শ্রুতৱানস্মি ভার্গৱ।
অনুরুধ্যামহে ব্রহ্মন্ পিতুরানৃণ্যমাস্থিতঃ॥ **1.76.2** ॥

ৱীর্যহীনমিৱাশক্তং ক্ষত্রধর্মেণ ভার্গৱ।
অৱজানাসি মে তেজঃ পশ্য মেঽদ্য পরাক্রমম্॥ **1.76.3** ॥

ইত্যুক্ত্বা রাঘৱঃ ক্রুদ্ধো ভার্গৱস্য ৱরাযুধম্।
শরং চ প্রতিজগ্রাহ হস্তাল্লঘুপরাক্রমঃ॥ **1.76.4** ॥

আরোপ্য স ধনূ রামঃ শরং সজ্যং চকার হ।
জামদগ্ন্যং ততো রামং রামঃ ক্রুদ্ধোঽব্রৱীদিদম্॥ **1.76.5** ॥

ব্রাহ্মণোঽসীতি পূজ্যো মে ৱিশ্ৱামিত্রকৃতেন চ।
তস্মাচ্ছক্তো ন তে রাম মোক্তুং প্রাণহরং শরম্॥ **1.76.6** ॥

ইমাং ৱা ৎৱদ্গতিং রাম তপোবলসমর্জিতান্।
লোকানপ্রতিমান্ ৱাপি হনিষ্যামীতি মে মতিঃ॥ **1.76.7** ॥

ন হ্যযং ৱৈষ্ণৱো দিৱ্যঃ শরঃ পরপুরঞ্জযঃ।
মোঘঃ পততি ৱীর্যেণ বলদর্পৱিনাশনঃ॥ **1.76.8**॥

ৱরাযুধধরং রামং দ্রষ্টুং সর্ষিগণাঃ সুরাঃ।
পিতামহং পুরস্কৃত্য সমেতাস্তত্র সর্ৱশঃ॥ **1.76.9**॥

গন্ধর্ৱাপ্সরসশ্চৈৱ সিদ্ধচারণকিন্নরাঃ।
যক্ষরাক্ষসনাগাশ্চ তদ্ দ্রষ্টুং মহদদ্ভুতম্॥ **1.76.10**॥

জডীকৃতে তদা লোকে রামে ৱরধনুর্ধরে।
নির্ৱীর্যো জামদগ্ন্যোঽসৌ রামো রামমুদৈক্ষত॥ **1.76.11**॥

তেজোভির্গতৱীর্যৎৱাজ্জামদগ্ন্যো জডীকৃতঃ।
রামং কমলপত্রাক্ষং মন্দং মন্দমুৱাচ হ॥ **1.76.12**॥

কাশ্যপায মযা দত্তা যদা পূর্ৱং ৱসুন্ধরা।
ৱিষযে মে ন ৱস্তৱ্যমিতি মাং কাশ্যপোঽব্রৱীৎ॥ **1.76.13**॥

সোঽহং গুরুৱচঃ কুর্ৱন্ পৃথিৱ্যাং ন ৱসে নিশাম্।
তদাপ্রভৃতি কাকুৎস্থ কৃতা মে কাশ্যপস্য হ॥ **1.76.14**॥

তামিমাং মদ্গতিং ৱীর হন্তুং নার্হসি রাঘৱ।
মনোজৱং গমিষ্যামি মহেন্দ্রং পর্ৱতোত্তমম্॥ **1.76.15**॥

লোকাস্ত্ৱপ্রতিমা রাম নির্জিতাস্তপসা মযা।
জহি তাঞ্ছরমুখ্যেন মা ভূৎ কালস্য পর্যযঃ॥ **1.76.16**॥

অক্ষয্যং মধুহন্তারং জানামি ৎৱাং সুরেশ্ৱরম্।
ধনুষোঽস্য পরামর্শাৎ স্ৱস্তি তেঽস্তু পরন্তপ॥ **1.76.17**॥

এতে সুরগণাঃ সর্ৱে নিরীক্ষন্তে সমাগতাঃ।
ৎৱামপ্রতিমকর্মাণমপ্রতিদ্ৱন্দ্ৱমাহৱে॥ **1.76.18**॥

ন চেযং মম কাকুৎস্থ ব্রীডা ভৱিতুমর্হতি।
ৎৱযা ত্রৈলোক্যনাথেন যদহং ৱিমুখীকৃতঃ॥ **1.76.19** ॥

শরমপ্রতিমং রাম মোক্তুমর্হসি সুব্রত।
শরমোক্ষে গমিষ্যামি মহেন্দ্রং পর্ৱতোত্তমম্॥ **1.76.20** ॥

তথা ব্রুৱতি রামে তু জামদগ্ন্যে প্রতাপৱান্।
রামো দাশরথিঃ শ্রীমাংশ্চিক্ষেপ শরমুত্তমম্॥ **1.76.21** ॥

স হতান্ দৃশ্য রামেণ স্বান্ লোকাংস্তপসার্জিতান্।
জামদগ্ন্যো জগামাশু মহেন্দ্রং পর্ৱতোত্তমম্॥ **1.76.22** ॥

ততো ৱিতিমিরাঃ সর্ৱা দিশশ্চোপদিশস্তথা।
সুরাঃ সর্ষিগণা রামং প্রশশংসুরুদাযুধম্॥ **1.76.23** ॥

রামং দাশরথিং রামো জামদগ্ন্যঃ প্রপূজিতঃ।
ততঃ প্রদক্ষিণীকৃত্য জগামাত্মগতিং প্রভুঃ॥ **1.76.24** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে ষটসপ্ততিতমঃ সর্গঃ ॥